श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीवरदभवस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवरदभवस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

सूर्यो विधिर्विधुविभूषितमस्तको वा
सर्वेऽपि तेऽदितिसुता भगवंस्त्वमेव।
तस्मादयं हि वरुणस्त्वयि देवदेवे
सिंहं गते वरदनाम्नि हरौ ववर्ष॥ १ ॥

आरुह्य हंसमत एव भवान् करीश!
वीथीषु विश्वजनतानयनोत्सवानाम्।
स्रष्टाऽभवत्तदियमत्र सरस्वती च
दाक्षिण्यतो वहति मय्यपि सन्नतेऽस्मिन्॥ २ ॥

ध्येयस्सदा सवितृमण्डलमध्यवर्ती
सन्ध्यां विधाय भगवानिति शास्त्रमस्तु।
सेव्यस्सदा सवितृमण्डलमध्यवर्ती
सन्ध्यां विधाय भगवानिति चात्र दृष्टम्॥ ३ ॥

सुमेरुगिरिसन्निभे सुभगपक्षयुग्मान्विते
सुवर्णमयविग्रहे श्रुतितनौ सुपर्णे स्थितः।
महेन्द्रमणिशैलवन्महितचक्रमुख्यान्वितः
मनोरथगणान् विभुः मम विभाति सम्पूरयन्॥ ४ ॥

हस्तिना च कमठेन तुन्दिले
हस्तिना त्वरितमाहृतः पुमान्।
हस्तिनापुरजपाण्डुजप्रियो
हस्तिशैलदयितो विराजते॥ ५ ॥

www.prapatti.com

मारुतेरुपरि चार ते पदं
    मेरुशृङ्गगतसूरसम्पदम्।
निन्दतीव किल सत्यमुच्यते
    येन भानुरपि नैव दृश्यते॥ ६ ॥

अशेषलोकानपि सर्वशेषिन्!
    अहो विधातुं किल शेषभूतान्।
आरुह्य शेषं विहृतिं तनोषि
    वीथीषु सर्वास्वविशेषकान्तिः॥ ७ ॥

सूर्यप्रभेति दिनमित्यवगम्य देव्यौ
    नैव स्थितिं सह तदा भवता प्रपन्ने।
चन्द्रप्रभेति रजनीत्यवगम्य किन्तु
    साकं स्थितिं भगवता भवता प्रपन्ने॥ ८ ॥

अनिमिषमखिलं नेत्रं गगने नन्तुं च सञ्चरति।
उचितमथामृतदानं कर्तुं हि करीश! मोहिनीरूप!॥ ९ ॥

स्त्रीवेषं समुपागते भगवति श्रीदेवराजे कथं
    श्रीः स्त्रीस्तुष्टमना भुजान्तरगता माता हि सा यत्ततः।
अस्त्री सन्नयमाततान हि वधं देवद्विषां पापिनां
    सस्त्री सन्नधुना ततोऽपि महतीं कुर्याद्धि रक्षामिति॥ १० ॥

वीथीषु केलीर्विविधा विधाय
    यालिं समारुह्य जनौघमध्ये।
आयान्तमम्भोरुहपत्रनेत्र-
    मास्वादयन्तो वयमेव धन्याः॥ ११ ॥

गानं रूपमथो विभूषणकुलं बर्हं च मौलौ स्थितं
    दृष्ट्वा नन्दथुपीनदेहनिवहाः सर्वाः स्त्रियोऽपि ध्रुवम्।
ताभ्यस्सम्पतिताः किलात्र विषये काञ्च्यस्ततः काञ्च्यसौ
    कीर्त्याऽभून्नगरी कथन्नु परथा संज्ञा भवेत् साम्प्रतम्॥ १२ ॥

मनो मम हृतं त्वया वरद! वेणुगोपात्मना
मतिश्च मम मोहिता भवति नायके गायके।
इयं च कविता रता त्वयि कलापमौलौ कला
परत्र विरता परं कृतिरियं समाप्ता ततः॥ १३॥

॥ इति श्रीवरदभवस्तवः समाप्तः॥

www.prapatti.com